जासयिष्यन्-न्ती-ती, जिज्ञासयिषिष्यन्-न्ती-ती जसिष्यन्-न्ती-ती, जिज-सिषिष्यन्-न्ती-ती ; —

जासयमानः, जिजासयिषमाणः, — जाजस्यमानः ;

जासयिष्यमाणः, जिजासयिषिष्यमाणः, — जाजसिष्यमाणः ;

[1]उज्जाः-उज्जासौ-उज्जासः ; — —

जासितः, जिजासयिषितः, [2]जस्तं-तः, जिजसिषितः, जाजसितः-तवान् ;

जासः [A]असुरजासी, जिजासयिषुः, जसः, जिजसिषुः, जाजसः ;

जासयितव्यम्, जिजासयिषितव्यम्, जसितव्यम्, जिजसिषितव्यम्, जाजसितव्यम् ;

जासनीयम्, जिजासयिषणीयम्, जसनीयम्, जिजसिषणीयम् जाजसनीयम् ;

जास्यम्, जिजासयिष्यम्, जास्यम्, जिजसिष्यम्, जाजस्यम् ;

ईषज्जासः-दुर्जासः-सुजासः ; — —

जास्यमानः, जिजासयिष्यमाणः, जस्यमानः, जिजसिष्यमाणः जाजस्यमानः ;

जासः, जिजासयिषः, जासः, जिजसिषः, जाजसः ;

जासयितुम्, जिजासयिषितुम्, जसितुम्, जिजसिषितुम्, जाजसितुम् ;

जासना, जिजासयिषा, जस्तिः, जिजसिषा, जाजसा ;

जासनम्, [[3]चौरस्य]उज्जासनम्, जिजासयिषणम्, जसनम्, जिजसिषणम्, जाजसनम् ;

जासयित्वा, जिजासयिषित्वा, [4]जसित्वा-जस्त्वा, जिजसिषित्वा, जाजसित्वा ;

प्रजास्य, प्रजिजासयिष्य, प्रजस्य, प्रजिजसिष्य, प्रजाजस्य ;

---

1. णिजन्तात् क्विपि उपधावृद्धौ क्विब्लोपे णेर्लोपे च 'ससजुषो रुः' (8-2-66) इति रुत्वे विसर्गे च रूपम् ।

2. उदित्त्वेन क्त्वायामिड्विकल्पनात्, निष्ठायाम्, 'यस्य विभाषा' (7-2-15) इतीण्णिषेधः ।

3. कर्मणः शेषत्वविवक्षायाम् 'जासिनिप्रहण—' (2-3-56) इति षष्ठी भवति । तस्य च 'प्रतिपदविधाना षष्ठी न समस्यते' इति वचनात् समासाभावः फलम् ।

4. 'उदितो वा' (7-2-56) इति क्त्वायामिड्विकल्पः । तेन रूपद्वयम् ।

A. 'इत्थं वदत्यसुरजासिनि पिण्डितायस्स्थेमाऽथ रोषितमतिः प्रतिमल्लङेपी ।' धा. का. 3.32.